# आदर्श प्रश्नपत्र/ Model Question Paper
## वेदविभूषण द्वितीय-वर्ष / Vedavibhushan Second Year
## वर्ष / Year 2022-23

### विषय - संस्कृत

**वस्तुनिष्ठप्रश्नाः -** $1 \times 10 = 10$

1. अधोनिर्दिष्टेषु ऋग्वेदीयब्राह्मणं किम् ?

(क) ताण्ड्यब्राह्मणम् (ख) कौषीतकीब्राह्मणम्

(ग) आर्षेयब्राह्मणम् (घ) गोपथब्राह्मणम्

2. रघुवंशमहाकाव्यं कतिसर्गात्मकम् ?

(क) विंशतिसर्गात्मकम् (ख) एकविंशतिसर्गात्मकम्

(ग) द्वाविंशतिसर्गात्मकम् (घ) एकोनविंशतिसर्गात्मकम्

3. याज्ञवल्क्यः कस्य शिष्यः ?

(क) वैशम्पायनस्य (ख) कात्यायनस्य

(ग) बादरायणस्य (घ) बोधायनस्य

4. हरित्रातः इत्यस्य विग्रहवाक्यं किम् ?

(क) हरेः त्रातः (ख) हरि त्रातः

(ग) हरौ त्रातः (घ) हरिणा त्रातः

5. छन्दश्शास्त्रे 'स' गणस्यान्तिमवर्णो भवति ।

(क) लघुः (ख) गुरुः

(ग) अर्धमात्रिकः (घ) केवलं सकारः

6. युवजानिः इति पदस्य विग्रहः कः ?

(क) युवतिश्चासौ जाया च (ख) युवत्याः जाया

(ग) युवतिः जाया यस्य सः (घ) युवतिः जाया यस्मिन् सः

7. शतसाहस्रीसंहिता कथ्यते ?

(क) महाभारतम् (ख) गीता

(ग) रामायणम् (घ) पुराणम्

8. 'कृष्णसर्पः' इत्यत्र कः समासः ?

(क) द्वन्द्वसमासः (ख) कर्मधारयसमासः

(ग) बहुव्रीहिसमासः (घ) तत्पुरुषसमासः

9. "तत्पुरुषः" सूत्रमस्ति ।

(क) अधिकारसूत्रम् (ख) समाससूत्रम्

(ग) सञ्ज्ञासूत्रम् (घ) निपातसूत्रम्

10. पाणिनीयशिक्षायां कौ द्वौ पराश्रितौ वर्तेते ?

(क) अनुस्वारानुनासिकौ (ख) अनुस्वारविसर्गौ

(ग) रुत्वविसर्गौ (घ) जिह्वामूलीयोपध्मानीयौ

**रिक्तस्थानानां पूर्तिः करणीया** $1 \times 10 = 10$

11. अव्ययं विभक्ति ......................................................................।
...................................................................... वचनेषु॥

12. अथ शिक्षां......................................................................।
...................................................................... लोकवेदयोः॥

13. अष्टौ स्थानानि......................................................................।
...................................................................... तालु च ॥

14. संवृतं मात्रिकं ......................................................................।
...................................................................... विवृताः स्मृताः॥

15. छन्दः पादौ ......................................................................।
...................................................................... श्रोत्रमुच्यते॥

16. मदनुग्रहाय......................................................................।
...................................................................... विगतो मम ॥

17. इहैकस्थं......................................................................।
...................................................................... द्रष्टुमिच्छसि॥

18. किरीटिनं ......................................................................।
...................................................................... द्युतिमप्रमेयम्॥

19. त्रिविधा भवति ...........................................................................................।

........................................................................................................ तां श्रृणु ॥

20. एवमुक्त्वा ...........................................................................................।

........................................................................................................ रूपमैश्वरम्॥

**सत्यम्/असत्यम् इति चिनुत** $2 \times 5 = 10$

21. पञ्चमहाकाव्येषु कुमारसम्भवमहाकाव्यं द्वाविंशतिसर्गात्मकम्। ( )

22. शाखां शाखां प्रति यदुच्यते तत्प्रातिशाख्यम् । ( )

23. ऋचोऽर्धे तु द्विमात्रः स्यात् । ( )

24. ननमयययुतेयं मालिनी भोगिलोकैः । ( )

25. प्रायेणोभयपदार्थप्रधानो बहुव्रीहिः । ( )

**समुचितशब्दमेलनं कुरुत** $2 \times 5 = 10$

| | | |
|---|---|---|
| 26. | वेदोऽखिलो | वैदिकशब्दानां निर्वचनं व्याख्यानञ्च |
| 27. | शब्दशास्त्रं नाम | अथर्ववेदः |
| 28. | निरुक्तं नाम | कृष्णयजुर्वेदः |
| 29. | व्यासशिक्षा | व्याकरणम् |
| 30. | माण्डूकीयशिक्षा | धर्ममूलम् |

**अतिलघूत्तरीयाः प्रश्नाः** $2 \times 10 = 20$

31. भगवद्गीतायाः कस्मिन्नध्याये विश्वरूपदर्शनमस्ति ?

32. के अयोगवाहाः ?

33. अनुस्वारयमानाञ्चोच्चारणस्थानं किम् ?

34. रामायणे कति श्लोकाः सन्ति ?

35. महर्षिवेदव्यासस्यापरं नाम किम् ?

36. पाणिनीयशिक्षानुसारेण यमवर्णानां सङ्ख्या कति ?

37. असंयुतस्य हकारस्य उच्चारणस्थानं किं भवति ?

38. ऊष्मवर्णानां नामानि लिखत ?

39. श्रीमद्भगवद्गीतायाः सप्तदशाध्यायस्य नाम किम् ?

40. उभयपदप्रधानः कः समासः ?

**लघूत्तरीयाः प्रश्नाः** $3 \times 5 = 15$

41. श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति ? तेषु प्रथमषण्णामध्यायानां नामानि लिखत ?

42. समासः कतिविधः ? नामानि लिखत ?

43. अधमपाठकस्य के के गुणाः भवन्ति ?

44. वेदाङ्गेषु नयनम्, मुखम्, श्रोत्रम्, घ्राणञ्च कानि कानि अङ्गानि कथ्यन्ते ?

45. उदात्तानुदात्ते स्वरिते च क्रमशः के-के गानस्वराः अन्तर्भवन्ति ?

**दीर्घोत्तरीयाः प्रश्नाः** $5 \times 5 = 25$

46. तत्पुषबहुव्रीहिद्वन्द्वसमासानाम् उदाहरणानि दत्त्वा स्पष्टीकुरुत।

47. 'रघु-कौत्सवादं' सरलसंस्कृतभाषया स्वकीयैः 10 वाक्यैः विशदयत।

48. पाणिनीयशिक्षायाः वर्ण्यविषयं 10 वाक्यैः स्पष्टीकुरुत।

49. संस्कृतभाषायाः वैशिष्ट्यम् इति शीर्षकम् अवलम्ब्य स्वीयान् विचारान् प्रकटयत।

50. "सङ्गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्। देवा भागं यथा पूर्वे सञ्जानाना उपासते॥" इत्यस्य भावं सुरगिरा विशदयत।